# Shri Sharada Ashtaka Stotram

# श्रीशारदाष्टकस्तोत्रम्

## Document Information

Text title : Sharada Ashtaka Stotram

File name : shAradAShTakastotram.itx

Category : devii, aShTaka, devI, sarasvatI

Location : doc_devii

Author : Anandaramanam

Proofread by : Mohan Chettoor

Latest update : NOvember 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 20, 2022

*sanskritdocuments.org*

# श्रीशारदाष्टकस्तोत्रम्

(श्रीशारदाष्टकम्)
श्री शारदे चारुरूपे-
ऋष्यशृङ्गाचलस्थेभजेमातरन्त्वां
श्री शारदे चारुरूपे (श्री शारदे) ॥ ध्रुवपदम् ॥

तुङ्गानदीपुण्यतीरे-तापसानन्दपूरे तपोऽरातिचोरे ।
नित्यं वसन्तीं ज्वलन्तीं- सर्वविद्याधिदात्रीं
विरिञ्चेस्सुपत्नीम् ॥ (श्री शारदे) १ ॥

श्री शङ्करस्थापितां तां -
शान्तिदान्त्यादि सम्पूर्ण संन्यासि वन्द्याम् ।
सर्वार्थदात्रीं सवित्रीं-
देशिकेन्द्रस्वरूपेण सर्वत्र यान्तीम् ॥ (श्री शारदे) २ ॥

कारुण्य सम्पूर्ण नेत्रां-
शुभ्रवस्त्रां पवित्रां शरच्चन्द्रवक्त्राम् ।
सद्रत्नभूषाविचित्रां-
योगिवृन्दार्पितानन्दबिल्वादिपत्राम् ॥ (श्री शारदे) ३ ॥

श्री कुङ्कुमालिप्तगात्रीं-
भक्तवृन्दार्पितस्वीयकल्याणनेत्राम् ।
आविष्कृतानेकशास्त्रां -
अब्जसम्भूतसम्बद्ध माङ्गल्यसूत्राम् ॥ (श्री शारदे) ४ ॥

शृङ्गाद्रिवासां प्रणम्यां -
नाथरूपां नमद्राजराजधिदेवाम् ।
राज्यादिदानैकदीक्षां -
वेदवेदान्त सन्धायि कारुण्यवीक्षाम् ॥ (श्री शारदे) ५ ॥

अन्तर्मुखाराध्यदेवीं-
भक्तसम्बोधिदाम्नाय गम्भीर भावाम् ।
नित्यं कृतानेकसेवां-
त्याजिताज्ञान सम्भूत जीवात्मभेदाम् ॥ (श्री शारदे) ६ ॥

शुद्धस्वभावैरुपास्यां -
ऋष्यशृङ्गाद्रिपीठस्य संन्यासि वश्याम् ।
विद्यार्थिलोकेनवन्द्यां -
विष्णुरुद्रादिमान्यां सुपुण्यैकलभ्याम् ॥ (श्री शारदे) ७ ॥

लोकैकरक्षैकदीक्षां -
अक्षमालादिहस्तां यदीन्द्रादिपक्षाम् ।
अक्षय्यलक्ष्मीकटाक्षां
दृष्टमात्रेण तापादिसंहारवक्षाम् ॥ (श्री शारदे) ८ ॥

भक्त्याकृतं स्तोत्ररत्नं- दीक्षि
तानन्तरामेण विद्यादिसिद्ध्यै ।
श्री शारदा दोषमूलं -
भक्तियुक्तः पठेद्यो लभेतैव सर्वम् ॥ (श्री शारदे) ९ ॥

इति श्री अनन्तरामेणविरचितम् श्रीशारदाष्टकस्तोत्रं सम्पूर्णम् ।

Proofread by Mohan Chettoor

*Shri Sharada Ashtaka Stotram*

pdf was typeset on November 20, 2022

Please send corrections to *sanskrit@cheerful.com*